# श्रीपार्वत्यष्टकम्

Shri Parvatyashtakam

sanskritdocuments.org

March 23, 2018

# Shri Parvatyashtakam

# श्रीपार्वत्यष्टकम्

## Sanskrit Document Information

Text title : pArvatyaShTakam

File name : pArvatyaShTakam.itx

Category : devii, pArvatI, aShTaka

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan and PSA Easwaran psaeaswaran at gmail.com

Latest update : March 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 23, 2018

*sanskritdocuments.org*

# श्रीपार्वत्यष्टकम्

ॐ श्रीगणेशाय नमः ।

महारजतचेलया महितमल्लिकामालया
   तुलारहितफालया तुलितवारिभृज्जालया ।
शिवाभिमतशीलया शिशिरभानुचूडालया
   महीध्रवरबालया मम हृतं मनो लीलया ॥ १॥

नमज्जनभवान्तया नलिनशोभिनेत्रान्तया
   निरीतिकृदुदन्तया निजनिवासवेदान्तया ।
लसच्छुकशकुन्तया ललितकुन्दजिद्दन्तया
   मनो मम हृतं तया मनसिजान्तकृत्कान्तया ॥ २॥

सुवर्णसुमनासया सुरमहीधरावासया
   शशाङ्करुचिहासया शरबिषक्तबाणासया ।
कृपाकलितदासया कृतजगत्त्रयोल्लासया
   विभिन्नपुरशासया विवशितोऽहमत्रासया ॥ ३॥

कचालिजितभृङ्गया कमलजित्त्वरापाङ्गया
   कुतूहलिकुरङ्गया कुचयुगे महातुङ्गया ।
कनद्रुचितरङ्गया कलितविद्विषद्भङ्गया
   प्रसक्तहरसङ्गया परवशोऽस्मि वामाङ्गया ॥ ४॥

वतंसितकदम्बया वदनलोभिलोलम्बया
   कराद्दतकलम्बया क्रमविधूतकादम्बया ।
प्रणम्रधृतशम्बया प्रकटिताखिलम्बया
   हृतोऽस्मि जगदम्बया हृतशशाङ्कभृद्बिम्बया ॥ ५॥

जनीलसदहार्यया जनिमतां मनोधार्यया
   सुरारिवधकार्यया सुकृतिवैदितौदार्यया ।

परित्रयिविचार्यया प्रियकवृक्षभूचर्यया
    प्रकाशितहृदार्यया पशुपतेरहं भार्यया ॥ ६॥

प्रणम्रसुरवर्गया प्रकटितात्मभूसर्गया
    स्तुवानमुनिगर्गया स्तुतिकृदर्पितस्वर्गया ।
हिमाद्रिकुलनिर्गया हिततरत्नयीमार्गया
    मदाकुलितभर्गया मनसि मे स्थितं दुर्गया ॥ ७॥

पुरो नटितरम्भया पुरहरे स्थितारम्भया
    समग्रकुचकुम्भया सकलवन्द्यवाग्गुम्भया ।
शराहतनिशुम्भया शमितदुर्जनोज्जृम्भया
    भवाम्यहमदम्भया परवशो गणेड्डिम्भया ॥ ८॥

इति पार्वत्यष्टकं सम्पूर्णम् ॥

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com

Proforead by Sivakumar Thyagarajan and PSA Easwaran psaeaswaran at gmail.com

*Shri Parvatyashtakam*

pdf was typeset on March 23, 2018

Please send corrections to *sanskrit@cheerful.com*